Gyanshauryam, International Scientific Refereed Research Journal
© 2020 GISRRJ | Volume 3 | Issue 6 | ISSN : 2582-0095

# ‘मयमतम्’ दृष्ट्या भूपरीक्षाविचार:

**अव्यक्त रैणा**
**शोधच्छात्र:,**
**वास्तुशास्त्रविभाग:,**
**श्री ला. ब. शा. रा. सं. विश्वविद्यालय:,**
**नई दिल्ली**



**Article Info**
Volume 3 Issue 6
Page Number: 69-72

**Publication Issue :**
November-December-2020

**Article History**
Accepted : 01 Dec 2020
Published : 25 Dec 2020

**सारांश**:- मयस्य वास्तुशास्त्रे प्रमुखा रचना मयमतम् इति नामक: ग्रन्थ: अस्ति। अस्मिन् ग्रन्थे प्राय: वास्तुशास्त्रस्य प्रमुखानां सिद्धान्तानां संग्रहो वर्तते। मयमतग्रन्थेभूमिप्रकारनिर्धारणे किञ्चिद्वैशिष्ट्यं भिन्नत्वञ्च संल्क्षयते। तत्र निगदितमस्ति यत् श्वेत-रक्त- पीत- कृष्णवर्णा गजाश्वादिध्वनिनादयुता पूर्व दिशि उत्तरदिशि च प्लवयुता , षड्रसयुता-गो-धान्य-कमलगन्धयुता, लघुपाषाणावियुक्ता, तुषरहिता, दक्षिणदिशि पिश्चमदिशि च समुन्नता शल्यरहिता च भूमि: सर्वेषां श्रेष्ठा भवति। वस्तुत: कर्मगुणाद्यनुरूपं उचितभूमेश्चयनमावश्यकमस्ति आवासनिर्माणाय।
**मुख्य शब्द** – भूमि, मयमतम्, ग्रन्थ:, वास्तुशास्त्र:, तुषरहिता, दक्षिणदिशि, लघुपाषाणावियुक्ता ।

**भूमि:**भूमि-प्रासाद-यान-शयनासनानां चतुर्णाम् आश्रयस्थली भूमिरुच्यते। तत्र भू+मि किच्च वा ड़ीप् प्रत्ययेन स्त्रीलिङ्गे **भूमि:** इति पदं निष्पद्यते। पदस्यास्योनेकेऽर्था: भवन्ति यथा- पृथिवी, मृत्तिका,भूखण्ड:, भूसम्पत्ति:, स्थलम्, स्थिति: , विषय: , पदार्थ: , गो: इत्यादय:।[1] अत एव पुरातनकालादेव भूमे: प्रधानत्वं सर्वैरङ्गीकृतम् [2]। एतेषु चतुर्षु भूमि: आद्यस्थानस्था विद्यते, यतो हि भूमिरेव समस्तभूतानामाधारो वर्तते। सम्पूर्णस्य जगत: अवस्थिति: भूमौ एवास्ति।[3] कस्यापि स्थानस्य भूमि: तत्रस्थमृत्तिकाया: वर्ण-गन्ध-रस-आकार-दिशा-शब्द-स्पर्शादिदृष्ट्या विचारणीया भवति। भवननिर्माणात् पूर्वमेव तस्या भूमे: सर्वविधधर्माणां परीक्षां कृत्वा एव तस्या: भूमेर्ग्रहणं कर्त्तव्यम् ।[4]

गृहादिनिर्माणकाले भूमि: वर्णानुसारं विशेषरूपेण ज्ञातव्या भवति, तत्र भूमिरियं प्रधानाप्रधानभेदाद् द्विविधा भवति। अनयो: द्विविधयो: ग्रामादीनां निर्माणाय अप्रधानभूमिर्भवति, तथा आवासार्थं भवनादीनां निर्माणाय प्रधानभूमिर्विद्यते ।[5]

गृहादिनिर्माणपूर्वं भूमे: गुणधर्मिताया: परीक्षणमावश्यकं भवति। यदि भूमि: स्फटिता सशल्या वल्मीकादियुता समतलरहिता भवति तदा तस्यापरि स्थितं भवनं सुस्थिरं न भवति यतोहि मृत्तिकायां घनत्वं न स्यात्। अपि च वर्णगन्धरसाद्यनुसारेण भूमे:

**Copyright :** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

गुणधर्मितायाः तस्याः घनत्वस्य च ज्ञानं भवति । यथा- श्वेतमृत्तिकायुक्ताभूमिः अधिका घनत्वयुता परन्तु कृष्णवर्णा भूमिः अल्पघनत्वयुता। अतः बृहद्वास्तुमालायां प्रशस्तभूमिविषये निगदितमस्ति -

**अनूषरा स्निग्धञ्च प्रशस्ता च बहुदका ।**

**तृणोपलान्विता या सा मान्या वास्तुविधौ धरा।।**[6]

अस्मिन प्रसङ्गे आचार्यवराहमिहिरोऽपि निर्दिशति-

**शस्तौषधिद्रुमलता मधुरा सुगन्धा।**

**स्निग्धा समानसुखदा च मही नराणाम्।**

**अप्यध्वनि श्रमविनोदमुपागतानां**

**धत्ते श्रियं किमुत शाश्वतमान्दिरेषु ।।**[7]

तत्र आचार्येमयस्य मतानुसारमपि वास्तुविन्यासात्पूर्वं भूमेः परीक्षा अवश्यमेव कर्त्तव्या।

देवालय-प्रासाद-ब्राह्मणादिवर्णानां कृते सा भूमिर्विचारणीया वर्तते, या भूमिः आकारे वर्गाकारा (चतुरस्रा) आयताकारा वा स्यात्। काक-उलूकादिनिन्दिताकृतियुक्ता जीर्णशीर्णा भूमिः न ग्राह्या। पश्चिमदक्षिणदिशाभ्यामुत्थिता भूमिः प्रशस्ताः भवति। मानसारे अपि एतानि एव लक्षणानि कथितानि सन्ति।।[8]

**ध्वनिगन्धाद्यनुसारं भूमिपरीक्षणम् -** या भूमिः ताड्यमानेऽपि अश्व-गज -वीणा-नीर-मृदङ्गध्वनियुक्ता भवति, यस्याञ्च भूमौ पुन्नागजातिपुष्पाब्जधान्यपाटलादीनां गन्धः अनुभूयते, सा भूमिः श्रेष्ठा भवति ।[9]

अनेन प्रकारेण या भूमिः गवादिपशुधनस्य गन्धेन सुवासिता समतला स्यात् सा भूमिः श्रेष्ठा भवति निर्माणाय। अथ च सर्वविधानि बीजानि यत्र प्रोहन्ति। अपि च एकवर्णयुक्ता, स्निग्धा, कोमला उर्वरा च भूमिः सर्वप्रकारेण आवासार्थमुपयुक्ता मन्यते ।[10]

या भूमिः बिल्व-निम्ब-निर्गुण्डी-पिण्डित-सप्तपर्णक-सहकारैः षड्विधैवृक्षैः समन्विता एवञ्च समस्थला सा भूमिः श्रेष्ठा भवति।[11] या भूमिः श्वेतरक्तकपोतपीतकृष्णादिभिर्वर्णैर्युक्ता मधुराम्ल-लवणकटुकषायतिक्तैः षड्भी रसैर्युक्ता भवेत्, सा भूमिः लोके सर्वसम्पत्तिप्रदायिका भवति ।[12]

**भूमेरन्यशुभाशुभलक्षणानि -** भूमिर्यदि प्रदक्षिणाक्रमात् (पूर्वतः दक्षिणादिक्रमेण ) जलप्रवाहेण जलस्रोतेन वा आबद्धा वर्त्तते, अपि च सा शुभवर्णगन्धरसयुक्ता स्यात् तदापि सा भूमिर्मङ्लदायिका भवति ।[13]

हस्ताभ्यां मृत्तिकाग्रहणे यदि भूमिः मनोरमगुणयुक्ता प्रतीयते तर्हि सा भूमिनिर्माणायातीवा शुभा भवति ।[14] सा भूमि निर्माणकार्याय प्रशस्ता या भूमिः निष्कपाला निरुपला-कृमि-वल्मीकादिविहीना भवति।।[15]

एवमेव योग्यभूमौ किमपि शल्यं अस्थिर्वा न स्यात् । प्रस्फुटिताभूमिः, आर्द्रा भूमिश्च गृहादिनिर्माार्थं योग्या न भवति। निर्माणाय या भूमिः स्यात् सा तु अङ्गार-वृक्षमूल-शूलादिभिः वर्जिता भवेत् ।[16] पङ्कसङ्करकूप-दारुर्लोष्टकैश्च युक्ता भूमिर्निर्माणाय आवासाय च त्याज्या वर्तते। उक्तदोषेभ्यो रहिता भूमिः सर्ववर्णेभ्यः ग्राह्या उचिता च भवति। तस्मात् सा उपयुक्ता भूमिः सर्वेभ्यः वर्णेभ्यः सर्वसम्पत्तिप्रदायिका भवति अर्थात् मङ्गलफलदायिका भवति ।[17]

या भूमिः दधिमधुतैलरक्तादिगन्धयुक्ता भवति, सा भूमिः त्याज्या भवति इति विद्वद्भिरुक्तम्।[18] अपि च शवमत्स्यमृतपक्षीगन्धयुक्ता भूमिर्निन्दिता भवति तस्या भूमेरावासार्थं ग्रहणं न प्रकर्त्तव्यम् ।[19]

एवमेव सभागृहशौचालयचैत्यालयनृपनिवासादीनां समीपस्थभूमेर्ग्रहणं सामान्यजन भवननिर्माणाय न कर्त्तव्यम्।[20] देवालयस्य समीपस्थभूमिः कण्टकद्रुमयुक्ता, वृताकार- त्रिकोणीयाकार-वज्राकार-कच्छपाकारभूमयोऽपि च सोन्नतभूमिः त्याज्या भवति ।[21]

सा भूमिरप्यस्वीकार्या वर्तते यस्यामुपरि चाण्डालगृहस्य छाया पतति एवमेव चर्मकारगृहसंलग्ना भूमिरग्राह्या भवति । एक-द्वि-त्रि-चतुर्मार्गयुक्ता भूमिः (मार्गवेधभूमिः) त्याज्या भवति निर्माणाय ।

या भूमिः मध्ये अवनता स्यात्, पणवाकारा स्यात्, मृदङ्गाकारयुक्ता स्यात्, मत्स्याभायुक्ता स्यात्,यां परितश्च विशालकायाः वृक्षाः स्युः, सा भूमिर्ग्राह्या ।[22]

एवमेव देवप्रासादानां चैत्यवृक्षसंयुक्ता भूमिः, यां परितः सालवृक्षा स्युः, यस्यां भूमौ सर्पनिलयाः स्युः, यत्र च दुष्टजनानां वर्णसङ्कराणां निवासो भवति सा भूमिः त्याज्या ।[23] श्मशानभूमिः, आश्रमस्थानभूमिः, कपि-सूकरतुल्या भूमिः, वन-प्रदेश-सर्पसदृशा भूमिः, शूर्पोलूखसन्निभाकारयुक्ता भूमिर्निर्माणकार्याय त्याज्या भवति ।[24]

एवमेव शङ्खाकारभूमिः, मार्जार-कर्कटकृकलासादीनामाकारयुक्ता भूमिः, ऊषराभूमिः कृमिभिर्युक्ता गृहगोलिसमाकृतितयुश्च भूमिः त्याज्या भवति।[25] यस्यां भूमौ अनेके मार्गाःविद्यन्ते सा भूमिः वास्तुमतानुसारं निन्दिता भवति। सा भूमिः मार्गविद्धा कष्टप्रदा भवति । आवासादीनां निर्माणाय भूमिरियं त्याज्या भवति ।[26]

एवं विधदूषितभूमौ यदि आवासस्य निर्माणं क्रियते तदा सा भूमिर्दुर्भाग्यस्य सूचिका भवति। सा भूमिः सर्वदा अशुभफलानि ददाति ।[27]

अनेन प्रकारेण मयमते भूपरीक्षाविषये सुविस्तृतं वर्णनं प्राप्यते। यत्र भूमेः वर्णगन्ध- स्वाद प्लव- आकृत्यादिविषयानुगुणाः शुभाशभुफलानि निगदितानि सन्ति। वास्तुशास्त्रस्य मानकग्रन्थेष्वपि प्रायः अनेन प्रकारेणैव भूमेः शुभाभुभत्वं वर्णितं दृश्यते।

**सन्दर्भः-**

1. वामनशिवराम आप्टे, संस्कृत-हिन्दीशब्दकोशः, पृ. 812
2. मयमतम्, 2.3
3. मयमतम्, 2.9
4. वर्णगन्धरसाकारदिक्शब्दस्पर्शनैरपि ।
परीक्ष्यैवं यथायोग्यं गृहीता वधिनिश्चिता ॥ मयमतम्, 2.4
5. या सा भूमिरिति ख्याता वर्णानां च विशेषतः ।
द्विविधं तत् समुद्दिष्टं गौणमङ्गीत्यनुक्रमात् ॥ मयमतम्, 2.5
ग्रामादीन्येव गौणानि भवन्त्यङ्गी मही मता ।
6. बृ. वा. मा. मिश्रप्रमाण -77
7. बृ. सं. वा. वि - 86
8. मानसारः, 4.1-21
देवानां तु द्विजातीनां चतुरश्रायताः श्रुताः ।
वस्त्वाकृतिनिन्द्या सावाक्प्रत्यग्दिक्समुन्नता ॥ मयमतम्, 3.1
9.हयेभवेणुवीणाब्धिदुन्दुभिध्वनिसंयुता ।
पुन्नागजातिपुष्पाब्जधान्यपाटलगन्धकैः ॥ मयमतम्, 3.2
10. पशुगन्धसमा श्रेष्ठा सर्वबीजप्ररोहिणी ।

एकवर्णा घना स्निग्धा सुखसंस्पर्शनान्विता ॥ मयमतम्, 3.3

11. बिल्वो निम्बश्च निर्गुण्डी पिण्डितः सप्तपर्णकः ।

सहकारश्च षड्वृक्षैरारूढा या समस्थला ॥ मयमतम्, 3.4

12. श्वेता रक्ता च पीता च कृष्णा कापोतसन्निभा ।

तिक्ता च कटुका चैव कषायलवणाम्लका ॥ मयमतम्, 3.5

मधुरा षड्रसोपेता सर्वसम्पत्करी धरा ।

13.प्रदक्षिणोदकवती वर्णगन्धरसैः शुभा ॥ मयमतम्, 3.6

14. पुरुषाञ्जलिमात्रे तु दृष्टतोया मनोरमा ।

15. निष्कपाला निरुपला कृमिवल्मीकवर्जिता ॥ मयमतम्, 3.7

16.अस्थिवर्ज्या नसुषिरा तनुवालुकसंयुता ।

अङ्गारैर्वृक्षमूलैश्च शूलैश्चापि पृथग्विधैः ॥ मयमतम्, 3.8

17.पङ्कसङ्ककूपैश्च दारुभिर्लोष्टकैरपि ।

शर्कराभिरयिक्ता या भस्माद्यैस्तु तुषैरपि ॥ मयमतम्, 3.9

स शुभा सर्ववर्णानां सर्वसम्पत्करी धरा ।

18. दध्याज्यमधुगन्धा च तैलासृग्गन्धिका च या ॥ मयमतम्, 3.10

19. शवमीनपक्षिगन्धा (या?) सा धरा निन्दिता वरैः ।

20.सभाचैत्यसमीपस्था नृपमन्दिरसंश्रिता ॥ मयमतम्, 3.11

21.देवालयसमीपस्था कण्टकिद्रुमसंयुता ।

वृत्तत्रिकोणविषमा वज्राभा कच्छपोत्रता ॥ मयमतम्, 3.12

22.निम्नं यत् पणवाकारं पक्षीव मुरवोपमम् ।

मत्स्याभं तु चतुष्कोणे महावृक्षसमायुतम् ॥ मयमतम्, 3.14

23. चैत्यवृक्षयुतं सालचतुष्कोणसमाश्रितम् ।

भुजङ्गनिलयं चैव सङ्कराराममेव च ॥ मयमतम्, 3.15

24.श्मशानं चाश्रमस्थानं कपिलसूकरसन्निभम् ।

वनोरगनिभं टङ्कं शुर्पोलूखलसन्निभम् ॥ मयमतम्, 3.16

25. शङ्खाभं शङ्कुनाभं च बिडालकृकलासवत् ।

ऊषरं कृमिभिर्जुष्टं गृहगोलिसमाकृति ॥ मयमतम्, 3.17

26. अन्यदेवं विधं वस्तु निन्दितं वस्तुपाठकैः ।

बहुप्रवेशमार्गं च मार्गविद्धं च गर्हितम् ॥ मयमतम्, 3.18

27.तस्माद्दोषितभूमेः सर्वथा त्यागं कर्त्तव्यम् ।

यत् कर्म विहितं मोहादेवं भूते तु वस्तुनि ।

तन्महादोषहेतुः स्यात् सर्वथा तद् विवर्जयेत् ॥ मयमतम्, 3.19